

3
ZEN

॥ तलवकारोपनिषत्खंडार्थप्रारंभः ॥

SREE CHAMARAJENDRA
LIBRARY

श्रीमद्भनुमद्भीममध्वांतर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवायनमः ॥ हरिः ॐ ॥ अनंतगुणपूर्णायदोषदूरायविष्णवे ॥ नमःश्रीप्राणनाथायभक्तेभ्योभीष्टदायिने ॥ अस्याउपनिषदोविरिंचशिवसंवादरूपत्वात्तावत्रऋषीज्ञेयौ । देवतातुब्रह्मशब्दोदितो विष्णुः । छंदस्त्वक्षरपरिगणनंत्रात्रिष्टुभादियथायोग्यंज्ञेयं । जानन्नप्युमापतिर्विशेषज्ञानार्थंवा ज्ञातस्यदार्ढ्यार्थंवा लोकानुग्रहा र्थंवा सर्वेंद्रियप्रेरकंपृष्छतिब्रह्माणं ॥ केनेत्यादिना ॥ इषितंइष्टंसाध्वसाधुवाप्रति मनःकेनदेवेनप्रेषितंप्रेरितंसत्पततिगच्छति । करणत्वादवश्यंकेनचित्प्रेरितमितिवाच्यं । नतावज्जीवेन । निगृह्यतोपिविषयान्प्रतिपतनात् । अतोबलवतादेवेनैवप्रेरितमिति वाच्यं सकइतिप्रश्नाभिप्रायः । एषमग्रेपि । इषितमितीडागमःछांदसः । मुख्यवायुरस्तुमनःप्रेरकइत्यतआह । केनेति । प्रथमःस र्वजीवोत्तमः । प्राणोमुख्यवायुरपिकेनयुक्तःनियुक्तःप्रेरितःसन्प्रैतियाति । स्वंव्यापारंकरोतीत्यर्थः । तस्यापिपारतंत्र्यात्नमनःप्रे रकोवायुरितिभावः । इमांलौकिकींवैदिकींवावाचंकेनइषितांप्रेरितांवदंतिजनाइत्यर्थः । चक्षुःश्रोत्रमितिप्राण्यंगत्वादेकवद्भावः । उसंबुद्धिः । भोब्रह्मन्कोदेवोयुनक्ति नियुंक्ते । कःप्रेरयतीत्यर्थः॥ १॥ इतिशिवेनपृष्टोब्रह्मोवाचेतियोज्यं । यत्यः श्रोत्रस्यश्रो त्रंश्रवणशक्तिप्रदः मनसोमनःमननशक्तिप्रदः वाचोवागिंद्रियस्यवाचंवागुच्चारणशक्तिप्रदः प्राणस्यमुख्यवायोःप्राणःप्रणे ताचक्षुषःचक्षुर्दर्शनशक्तिंप्रदः। श्रोत्रादेर्नियंतायस्त्वयापृष्टःसइत्यन्वेति । सउसएव प्रसिद्धोविष्णुरेवेत्यर्थः । सइत्यस्यावृत्तिर्वा

उप० । हरिः ॐ । केनेषितंपततिप्रेषितंमनःकेनप्राणःप्रथमःप्रैतियुक्तः । केनेषितांवाचमिमांवदंतिचक्षुःश्रोत्रंकउदेवोयुनक्ति ॥ १ ॥ श्रोत्रस्यश्रोत्रंमनसोमनोयद्वाचोहवाचंसउप्राणस्यप्राणः

तदाहभाष्ये यःप्राणस्य चक्षुरादेश्च प्रणेता सविष्णुरितिधार्यतामिति । प्राणस्यप्राणमुतचक्षुषश्चक्षुरित्यादिकाण्वश्रुतेः । प्राणादयोवाक्यशेषादितिसूत्रात् । तत्रप्राणादिनियंतृर्विष्णुत्वनिर्णयादितिभावः । श्रोत्रादिप्रेरकज्ञानिनःफलमुच्यते । अतिमुच्येति । धीराधीमंतः । श्रोत्रादिप्रेरकत्वंविजानंतःअस्माल्लोकाद्दौतिकदेहात्प्रेत्यनिर्गत्य मृत्वेतिशेषवत् । अतिमुच्यलिंगबंधंहित्वा । अमृतामुक्ताभवंतीति ॥ २ ॥ कीदृशंहरेःप्रेरकत्वादिमाहात्म्यंयज्ज्ञानादमृतत्वंस्यादित्यतोपरिमितत्वात्तन्महिम्नोनसाकल्येनज्ञानंसंभवतीतिभावेनाह ॥ नतत्रेति ॥ तत्रहरेर्विश्वशासनादिमाहात्म्ये । चक्षुरादींद्रियंनगच्छति । अभिमानिनियन्यायेनचक्षुराद्यभिमान्युपलक्षिताःसर्वेदेवाअपिनजानंति (सामान्याकारेणापि) कात्स्न्र्येन । अतोयथायेनप्रकारेण । एतत्प्राणादिजगत् । अनुशिष्यात्प्रेरयेत् । तंप्रकारंवयंनविद्मनविद्मः । विसर्गलोपःछांदसः । अडागमाभावेनलङिरूपंवा । सामान्याकारज्ञानमेवनास्ति । कुतोविशेषज्ञानमितिभावेनाह । नविजानीमइति । तदाहभाष्ये । अगम्यःसर्वदेवैश्चपरिपूर्णत्वहेतुतःइति ॥ ३ ॥ कुतोस्यपरिपूर्णत्वमित्यतोलोकविलक्षणवस्तुत्वादिविहेतोरित्याह ॥ अन्यदेवेति ॥ तत्चक्षुराद्यगम्यंवस्तु विदितात्प्रमिताज्जगतः अथोअविदितादप्रमिताच्छशशृंगादेश्चान्यदेव विलक्षणमेवेत्यर्थः । विदितादन्यदित्युक्तौनिःस्वरूपताशंकाव्युदासायाथोअविदितादन्यदित्युक्तिः । केचिद्व्यक्ताव्यक्तजगतोन्यदित्यर्थमाहुः । अधिसर्वोत्तमइत्यर्थः । तथाचभाष्यं । सर्वोत्तमश्चसर्वत्रेति । इत्ये

उप० । चक्षुषश्चक्षुरतिमुच्यधीराःप्रेत्यास्माल्लोकादमृताभवंति ॥ २ ॥ नतत्रचक्षुर्गच्छतिनवाग्गच्छतिनोमनोनविद्मनविजानीमोयथैतदनुशिष्यात् ॥ ३ ॥ अन्यदेवतद्विदितादथोअविदितादधि ।

वंप्रकारेणपूर्वेषांव्यासप्रभृतीनांसकाशात्शुश्रुमश्रुतवंतःस्मः । श्रवणस्यचिरकालीनत्वद्योतनायपरोक्षार्थकलिट्प्रयोगः । लिङर्थे लिड्वा । नोस्मान्प्रतियेपूर्वेतद्ब्रह्मव्याचचक्षिरेव्याख्यातवंतःतेषांपूर्वेषामित्यन्वयः ॥ ४ ॥ ननुमनोवागगोचरजीवरूपत्वात्ब्रह्म णःवाङ्मनसागोचरत्वोक्तिरयुक्तेत्यतोनतत्रचक्षुर्गच्छतीत्यादेस्तात्पर्योक्तिपूर्वकंपंचभिर्मंत्रैर्भेदमाह ॥ यद्वाचेति ॥ यद्ब्रह्मवाचा नभ्युदितंसाकल्येननोक्तं । येनप्रेरितासतीवाक्अभ्युद्यतेपुरुषैरुच्चार्यते । तदेवत्वंब्रह्मविद्धिजानीहि । नेदंजीवस्वरूपंब्रह्मतेतव उपसमीपेआस स्तिङंतप्रतिरूपकमव्ययं आस्तेनियामकतयावर्तते । इदमेवब्रह्मेतितदेवविद्धीत्यर्थः । एवमग्रेप्यर्थोध्येयः । पुरु षोनमनुते । मतंविज्ञातं । चक्षूंषिपश्यंतिदृश्यंतइत्यर्थः । नमनुतइत्यादौसाकल्येनेतिज्ञेयं । प्राणेनमुख्यवायुनानप्राणितिनचे ष्टते । प्रणीयते प्रेर्यते । तदाहभाष्ये । प्राणादीनांप्रणेताचसर्ववेत्ताचसर्वशः । यंसम्यङ्नैवजानातिकश्चिन्निरवशेषतः । नेदंजी वस्वरूपंतद्ब्रह्मविष्णवाख्यमव्ययं । किंतुयत्तेसमीपस्थंआस तेविनियामकं । तदेवब्रह्मविद्धित्वमिति । तथान्यत्प्रतिषेधादितिसू त्रभाष्येतु यदिदंवासनामयमुपासतेध्यायंतिनेदंवासनामयंब्रह्म । किंतुतदेववाङ्मनोगोचरंवासनामयस्थंब्रह्मविद्धिइत्यर्थोभि

उप० । इतिशुश्रुमपूर्वेषांयेनस्तद्व्याचचक्षिरे ॥ ४ ॥ यद्वाचानभ्युदितंयेनवागभ्युद्यते । तदेवब्रह्मत्वंविद्धिनेदंयदिदमुपासते । यन्मन सानमनुतेयेनाहुर्मनोमतं । तदेवब्रह्मत्वंविद्धिनेदंयदिदमुपासते । यच्चक्षुषानपश्यतियेनचक्षूंषिपश्यंति । तदेवब्रह्मत्वंविद्धिनेदंयदिदमुपासते । य च्छोत्रेणनशृणोतियेनश्रोत्रमिदंश्रुतं । तदेवब्रह्मत्वंविद्धिनेदंयदिदमुपासते । यत्प्राणेननप्राणितियेनप्राणःप्रणीयते । तदेवब्रह्मत्वंविद्धिनेदंयदिदमुपा सते ॥ ५ ॥ प्रथमःखंडः ॥ १ ॥

हितः ॥ ५ ॥ प्रथमःखंडः ॥ १ ॥ ब्रह्मेसाकल्येननज्ञेयमित्युक्तमर्थंव्यनक्ति ॥ यदिमन्यसइत्यादिना ॥ हेमहेश्वरअहंसुवेदब्रह्मसम्यग्जानामीतियदिमन्यसे । तर्हित्वमपिनूनंदहरमेवअल्पमेवब्रह्मणोरूपंवेत्थ । तस्यानंतत्वादितिभावः । यद्यस्मात्दहरमेववेत्थअथतस्मात्त्वंत्वयिव्यत्ययस्तूदेवेषुवास्यब्रह्मणोयद्रूपं तदितिशेषः । मीमांस्यमेवविचार्यमेव । नुइदानींतेत्वयेति ॥ १ ॥ नभवत्वन्येषांकात्स्न्येनब्रह्मज्ञानित्वं । तवतुअस्तिसम्यग्ज्ञानित्वमितिपृष्टोब्रह्मावक्ति ॥ मन्यइति ॥ अन्येसम्यग्वेदब्रह्मायमितिमांप्रवदंति । अहंतुब्रह्मविदितंनमन्यइतियोजना । तर्हित्वमपिसर्वथानवेत्थकिमित्यतआह ॥ नोनेति ॥ नवेदेतिनोनजानामीतिन० । किंतुवेदचेति । ब्रह्मणःसाकल्येनाज्ञेयत्वमुपपाद्योपसंहरति ॥ योनइत्यादिना ॥ नोअस्माकंमध्येयस्तुब्रह्माहंवेदेतिवदतिसतन्नोवेद । कुतः । परिच्छिन्नत्ववेदनात् । अहंनवेदेतियो (वदति) वेदअसौवेदच । कुतः । ब्रह्मणोऽपरिच्छिन्नत्वज्ञानात् । योनइत्यादिनासाकल्येनश्रवणागोचरत्वमुक्त्वामननागोचरत्वंचाह ॥ यस्येति ॥ यस्यब्रह्मामतंअविचारितमितिमतंबुद्धिःतस्यपुंसोब्रह्ममतंविचारितं । अनंतत्वज्ञानात् । यस्यब्रह्म (मया) मतंविचारितमितिमतंबुद्धिःसनवेदअनंतत्वाज्ञानात् ॥ २ ॥ साक्षात्कारोपिसाकल्येननेत्याह ॥ अविज्ञातमिति ॥ वयंब्रह्मसाक्षात्कृतवंतइतिविजानतांअविज्ञातं । ब्रह्मानंत्यावि

उप० । यदिमन्यसेसुवेदेतिदहरमेवापिनूनंत्वंवेत्थब्रह्मणोरूपं । यदस्यत्वंयदस्यदेवेष्वथनुमीमांस्यमेवते ॥ १ ॥ मन्येविदितंनाहमन्येसुवेदेतिनोनवेदेतिवेदच । योनस्तद्वेदतद्वेदनोनवेदेतिवेदच । यस्यामतंतस्यमतंमतंयस्यनवेदसः ॥ २ ॥ अविज्ञातंविजानतांविज्ञातमविजानतां ।

ज्ञानात् । अविजानतामुक्तरीत्याज्ञानहीनानां । नास्माभिर्ब्रह्मसम्यक्साक्षात्कृतमित्येवंजानतामिति यावत् । विज्ञातं । ब्रह्मसाक्षात्कृतमित्यर्थः । अनंतत्ववेदनादित्यर्थः । तदाहभाष्ये । सर्वात्मनाविजानामीतितुयस्यमतंभवेत् । तस्याज्ञातःसभगवान्योनैवं मन्यतेसदा । ज्ञातस्तस्यतथाह्यैवनिश्शेषंमननंकृतं । इतियोमन्यतेनास्यमतःसपुरुषोत्तमः । नातिवेद्योनचावेद्यस्तस्मात्सपुरुषोत्तमइति । ब्रह्मणःसाकल्येनाज्ञेयत्वे कथंतेनेष्टसिद्धिरित्यतःस्वस्वयोग्यैकदेशज्ञानादेवेष्टसिद्धिरित्याह ॥ प्रतिबोधविदितमिति ॥ श्रुतमितिशेषः । स्वस्वयोग्यतानुसारेणपुंभिःश्रुतंमतंविचारितंविदितंब्रह्मविंदतेलभते । प्रापयतीत्यर्थतयावायोज्यं हिप्रसिद्धं । नकश्चिद्ब्रह्मवित्स्मृतिमनुभवति । मुक्तोह्येवभवतीत्यादावित्यर्थः । तथाचसूत्रं । अनियमःसर्वेषामिति । ज्ञानेनामृतत्वं विंदतेचेत्तेनैवकिंस्वयोग्यसर्वानंदप्राप्तिरित्यतोन किंतुज्ञानोत्तरकर्मणापीत्याह । आत्मनेति । आत्मशब्दोत्रज्ञानोत्तरकालीनयज्ञादिप्रयत्नपरः । आत्मनाआत्मीययज्ञादिप्रयत्नेनवीर्यंआनंदातिशयंविंदतेलभते । विद्ययाअपरोक्षज्ञानेनअमृतंअविद्यापरिहाररूपांमुक्तिंप्राप्नोतीतिविद्वीत्यनुषंगेनयोज्यं ॥ ३ ॥ अस्तुस्वयोग्यब्रह्मज्ञानमभीष्टदं तत्कदासंपादनीयमित्यतआह ॥ इहेति ॥ ज्ञानयोग्येब्राह्मणःदिदेहेअवेदीच्चेत्व्यजानाच्चेद्ब्रह्मअथतर्हिसत्यमस्ति सत्यशब्दस्यसच्छब्दपर्यायत्वात्सच्छब्दस्यचसद्भावेसाधुभावेचेतिवचनात्साध्वस्तिभद्रमस्तीत्यर्थः । इहचेन्नावेदीत्तदामहतीविनष्टिःहानिर्भवति । अतोज्ञानाज्ञानाभ्यांसाध्वनिष्टयोर्भा

उप० । प्रतिबोधविदितंमतममृतत्वंहिविंदते । आत्मनाविंदतेवीर्यंविद्ययाविंदतेमृतं ॥ ३ ॥ इहचेद्वेदीदथसत्यमस्तिनचेदिहावेदीन्महतीविनष्टिः । भूतेषुभूतेषुविचिंत्यधीराःप्रेत्यास्माल्लोकादमृताभवंति ॥ ४ ॥ द्वितीयःखंडः ॥ २ ॥

वाद्धीराभूतेषुतेषुसर्वभूतेषुब्रह्मविचिंत्यज्ञात्वाअस्माल्लोकात्प्रेत्यअमृताभवंतीति ॥ ४ ॥ इतिद्वितीयःखंडः ॥ २ ॥ अत्यद्भुत त्वाद्ब्रह्मसाकल्येनाज्ञेयमित्युक्तेर्थेकांचनाख्यायिकामाह ॥ ब्रह्मेति ॥ देवानांदैत्यदानवैर्युद्धेप्रस्तुतेसतिब्रह्मदेवानाविश्यदेवेभ्यो देवानामर्थेदैत्यादीन्विजिग्ये व्यजैष्यत् । हेतिनिश्चितमेतदित्यर्थः । अथविजयानंतरंतस्यदेवेष्वाविष्टस्यब्रह्मणोविजयेसतिदेवा अमहीयंतापूज्यंत । महीङ्पूजायामित्यस्मात्कंड्वादिभ्योयगितियक्प्रत्ययः । गर्विणोअभवन्नितियावत् । हेत्याश्चर्यं । ब्रह्मणो विजयेकुतोदेवानांगर्वइति तदेवव्यनक्ति ॥ तइति ॥ तेदेवाअस्माकमेवायंविजयोस्माकमेवायंमहिमेतिऐक्षंतव्यजानन् । एषां देवानांतदसुरावेशकृतेश्वराज्ञाननिमित्तंअहंकारादिकंविजज्ञौव्यजानात् । ब्रह्मेत्यनुषंगः ॥ १ ॥ तेभ्योदेवेभ्योर्थेदेवानांस्वात्म तत्त्वबोधाययक्षरूपतयाप्रादुर्बभूवब्रह्मेत्यर्थः । उमाशिवचतुर्मुखसहितंसदितियोज्यं । तद्यक्षरूपंब्रह्मइदंयक्षंकिमितिनव्यजानंत नव्यजानन् । तदातेदेवाअग्निमब्रुवन् । हेजातवेदएतद्यक्षंकिमितिविजानीहीति । तथेत्युक्त्वासोग्निस्तद्यक्षंअभिआभिमुख्येना भ्यद्रवत्अगमत् । तद्यक्षंअभिमुखंगतंअग्निंकोसीत्यवदत् । अग्निरहमस्मिजातवेदाअहमस्मीत्यग्निरब्रवीत् । वैप्रसिद्धमेतन्नामम

उप० । ब्रह्महदेवेभ्योजिग्ये । अथतस्यहब्रह्मणोविजयेदेवाअमहीयंत । तऐक्षंतअस्माकमेवायंविजयोअस्माकमेवायंमहिमेति । तद्धैषांविजज्ञौ ॥ १ ॥ तेभ्योहप्रादुर्बभूव । तन्नव्यजानंतकिमिदंयक्षमिति । तेग्निमब्रुवन् । जातवेदएतद्विजानीहिकिमेतद्यक्षमिति । तथेतितदभ्यद्रवत् । तमभ्यवदत्कोसीत्यग्निर्वाअहमस्मीत्यब्रवीज्जातवेदावाअहमस्मीति ।

मेत्यर्थः । तस्मिंस्त्वयि तादृशेत्वय्किंवीर्यमित्यपीदं सर्वमदहेयंइत्यग्निरब्रवीत् । तस्मैअग्नये एतद्धेत्युक्त्वाकिंन्वितृणंततुरतोनिदधौयक्षमित्यर्थः । तत्तृणंदग्धुंसर्वजवेनसर्ववेगेनोपप्रेयायसमर्पमगमत् । गत्वातन्नशशाक दग्धुं । सोग्निस्ततएव तावन्मात्रतएव । यक्षरूपमनिर्धार्यनिवृतेनिवृत्तवान् । निवृत्त्यचदेवानब्रवीत् । यदेतद्यक्षमिति एतद्वि ज्ञातुंनाशकमिति ॥ २ ॥ अथानंतरं वायुंनासिक्यवायुं । प्राग्वद्व्याख्या । आददीयआददानीत्यर्थः । तस्मात्तिरोदधे । तस्मा त्प्रदेशादन्तर्हितमभूदितिवा । इंद्रस्याधिकबुद्धित्वान्मांप्रतिकोसीतिप्रश्नेकृतेअसुरावेशदूषितत्वेनेदानींमयाब्रह्मणाशिवेनचसा क्षादुपदेशानर्हत्वात्तिरोदधइतिवार्थस्तस्मादित्यस्य । ब्रह्मादिभिःसहेतियोज्यं । सइंद्रस्तस्मिन्नेवयक्षतिरोधानाकाशप्रदेशएवयक्षे णोपदेशार्थंस्थापितांस्त्रियंदृष्ट्वाजगाम । तत्समीपंप्राप्तवान् । साकेत्यतउक्तं ॥ बह्विति ॥ हैमवतींहिमवत्पुत्रीं । एतद्यक्षंकिमि

उप० । तस्मिंस्त्वयिकिंवीर्यमित्यपीदंसर्वंदहेयंयदिदंपृथिव्यामिति । तस्मैतृणंनिदधावेतद्दहेति । तदुपप्रेयायसर्वजवेन । तन्नशशाकदग्धुं सततएवनिवृते । नैतदशकंविज्ञातुंयदेतद्यक्षमिति ॥२॥ अथवायुमब्रुवन् । वायवेतद्विजानीहिकिमेतद्यक्षमिति । तथेतितदभ्यद्रवत् । तमभ्य वदत्कोसीति । वायुर्वाअहमस्मीत्यब्रवीन्मातरिश्वावाअहमस्मीति । तस्मिंस्त्वयिकिंवीर्यमिति । अपीदंसर्वमाददीययदिदंपृथिव्यामिति । तस्मैतृणं निदधावेतदादत्स्वेतितदुपप्रेयायसर्वजवेनतन्नशशाकादातुं । सततएवनिवृते । नैतदशकंविज्ञातुं । यदेतद्यक्षमिति । अथेंद्रमब्रवन् । मघवन्नेत द्विजानीहिकिमेतद्यक्षमितितथेतितदभ्यद्रवत् । तस्मात्तिरोदधे । सतस्मिन्नेवाकाशेस्त्रियमाजगामबहुशोभमानामुमांहैमवतीं । तांहोवाचकिमेतद्य क्षमिति ॥ ३ ॥ तृतीयःखंडः ॥ ३ ॥

तितांदेवीमुवाच पप्रच्छेत्यर्थः ॥ ३ ॥ इतितृतीयःखंडः ॥ ३ ॥ इंद्रेणपृष्टासातद्यक्षंब्रह्मेतिहोवाच । हेतिनिश्चयमाह । एतदे
तस्यदेवेष्वनुप्रविष्टस्यब्रह्मणोविजयेतद्विजयनिमित्तममहीयध्वं । महिमवंतोभवत । नत्वात्मनोविजयनिमित्तंगर्विणोभवत । वै
निश्चयमेतत् । इतिचोवाचहवैइत्यम्बूयः । एवमुमयोपदिष्टइंद्रःकिंचकारेत्यतआह ब्रह्मशिवंप्रति ॥ ततइति ॥ ततोहवैदेव्यु
पदेशादेव । तद्यक्षंइंद्रःब्रह्मेतिदैत्यविजयोस्मदनुप्रविष्टब्रह्मकृतइत्यादिविदांचकारज्ञातवान् । तस्माद्वैतस्मादेवगर्वशून्यत्वादेव ।
एतेदेवाःब्रह्मवायुशेषवींद्रशिवाःसभार्याअन्यान्देवानतितरां । अन्यदेवेभ्योअधिकाइत्येकोर्थः । इवशब्दस्तुगर्वाभावादाधिक्यं
अविद्यमानंदेवानांनेदानीमेवप्राप्तं किंत्वनादिसिद्धमेव । तदिदानींव्यक्तमभूदित्यभिप्रायः । अन्योर्थस्तु । तस्माद्वैयक्षतयाप्रा
दुर्भूतस्यस्वरूपंविचार्यमितिप्रथममुक्तत्वादेव । एतेदेवाःकामदक्षबृहस्पतिस्वायंभुवमन्वनिरुद्धसूर्यचंद्रधर्मवरुणाअन्यान्देवानति
तरामिवेतिप्रागिवास्यार्थः । तत्रापिदक्षादिभ्यःप्राग्विचार्ययक्षमित्युक्तत्वात्कामस्तेभ्योधिकइतिज्ञेयं । तृतीयोर्थस्तु । तस्माद्वैय
क्षात्मब्रह्मणःपूर्वदृष्टत्वादेव । एतेदेवाःअन्यान्देवानतितरामिवेति । एतेदेवाःकेइत्यतस्तानाह । यदग्निर्वायुरिंद्रइति । योग्नियों
वायुर्यइंद्रइतिएतेदेवाः । वायुरत्रनासिक्योग्राह्यः ॥ १ ॥ कुतएतेअधिकाइत्यतःतस्मादित्युक्तहेतुंव्यनक्ति । तेहीति । तेहिय

उप० । ब्रह्मेतिहोवाच । ब्रह्मणोवाएतद्विजयेदेवाअमहीयध्वमिति । ततोहवैविदांचकारब्रह्मेति । तस्माद्वाएतेदेवा अतितरामिवान्यान्दे
वान्यदग्निर्वायुरिंद्रस्तेह्येनन्नेदिष्ठंपस्पर्शुः ॥ १ ॥

स्मादेतद्यक्षरूपंब्रह्मनेदिष्ठंसमीपस्थं । कालतःसामीप्यंमत्रध्येयं । इतरेभ्यःपूर्वकालएवपस्पृशुः । स्पृशआमर्शने । परामर्शकृतवं
तइत्यर्थः । परामर्शश्चाग्निवायोर्यक्षदर्शनमात्रं । इंद्रस्यतुयक्षस्यब्रह्मत्वादिनाज्ञानंध्येयं । तद्व्यनक्ति ॥ तेह्वेति ॥ अग्निर्वायविंद्राःप्र
थमःप्रथमंविदांचकारविदांचक्रुः । वेदनंचेंद्रस्यदेव्युपदेशात् । अन्ययोस्तुइंद्रोपदेशादितिभावेनेंद्रज्ञानोदयप्रकारमाह ॥ तस्मा
द्वाइति ॥ तस्मादित्युक्तंहेतुंव्यनक्ति ॥ सह्येनदिति ॥ एनत् देवं । तद्वाक्यार्थमेवव्यक्तमाह ॥ सह्येनत्प्रथमइति ॥ प्रथ
ममित्यर्थः ॥२॥ अधिदैवतमध्यात्मंचोपास्यरूपमुपदिशति ॥ तस्यैषइत्यादिना ॥ तस्यब्रह्मणःएषआदेशः । उपदेशः । यदेतत्कपि
लाख्यं(रूपंवि)परंविद्युतः बहुवचनमाद्यर्थेउपलक्षणंवा । विद्युदादीन्तेजोरूपानर्थानासमंताद्द्युतत् । व्यद्योतयत् । आदीपय
दिति । आन्यमीमिषत् । सम्यक्न्यमीलयत् । आःपूर्णब्रह्माक्षिणीनिमील्यक्षीरसागरेशेतेइतियावत् । आःप्रगृह्यंस्मृतौवाक्येप्या
स्तुस्यात्कोपपीडयोरित्यव्ययवर्गेअमरोक्त्याप्रगृह्यसंज्ञिकस्यआइतिनिपातस्यचसत्वेनभाष्येन्यमीमिषदाइत्यत्रप्रगृह्याकारस्यसंध्य
भावेनआसमंतादित्येकमर्थमुक्त्वाआइतिपदविभागमाश्रित्यआःपूर्णमित्यर्थउक्तः । इत्येषआदेशःअधिदैवेस्थितस्यतस्येति । इ
तिशब्दद्वयस्यपूर्वेणान्वयः । अथेत्यर्थांतरे । अध्यात्मंदेहे । तस्योपदेशउच्यतइत्यर्थः । यदेतन्मनोऽनेनैवप्रेरितंसङ्कल्पतीवच ।

उप० । तेह्वेनत्प्रथमोविदांचकारब्रह्मेति । तस्माद्वाइंद्रोतितरामिवान्यान्देवान् । सह्येनन्नेदिष्ठंपस्पर्श । सह्येनत्प्रथमोविदांचकारब्रह्मेति
॥ २ ॥ तस्यैषआदेशोयदेतद्विद्युतोभिव्यद्युतदा ३ इति । न्यमीमिषदा ३ इत्यधिदैवतं ॥ अथाध्यात्मं ।

सम्यङ्गच्छतिसाकल्येनवस्तुनविषयीकरोति । अनेनैवानिरुद्धाख्येनहरिणायद्विषयजातंउपस्मरति । कीदृशंमनइत्यतउक्तं । अभीक्ष्णंसंकल्पइति । भृशमनेकार्थान्संकल्पयतीतिसंकल्पः । संकल्पकमित्यर्थः । लिंगव्यत्ययश्छांदसः । शब्दस्वभावाद्वा । अभीक्ष्णंनित्यंभृशंसंकल्पश्चभवति । तस्यानिरुद्धस्यहरेरेषउपदेशइत्यर्थः । तस्योपास्त्यर्थमन्वर्थनामाह । तद्धेति । तद्ब्रह्मतद्धनं नामततत्वाद्व्याप्तत्वाद्धननीयत्वाद्भजनीयत्वात्तद्धनमितिनामवत् । तनोतेस्त्यजियजितनिभ्योडतिरितिडतिप्रत्ययः । वनतेरकारः । तच्चतद्धनंचेतितद्धनमिति । हेतिप्रसिद्धं ॥ ३ ॥ तद्धनमित्युपासकस्यफलमाह सयइति । सप्रसिद्धोधिकारीएतद्ब्रह्मएवं तद्धनमित्येवंरूपेणवेद । एनंतद्धनत्वज्ञानिनंसर्वाणिभूतान्यभिवांछंति । सर्वापेक्षितोभवतीत्यर्थः । एवंश्रुत्वापुनर्ब्रह्माणंपृच्छत्युमापतिः । उपनिषदंभोब्रूहीति । भोब्रह्मन्उपनिषदंसप्रतिष्ठांसायतनांब्रूहीत्यपृच्छदितिशेषः । किमुपनिषत्प्रतिपाद्यंपृच्छसि । उतउपनिषदुत्पन्नविद्यायाःअवस्थानकारणं किंवाविद्यायाःकारणमितिहृदिविकल्प्यक्रमेणोत्तरमाह ॥ उक्तातइति ॥ तेतुभ्यंब्राह्मींब्रह्मविषयांवावेत्यसंशयं । उउपनिषदंउपनिषत्स्वरूपंअब्रूमअवोचामेतिब्रह्मोवाचेतियोज्यं । ब्रह्मेतिहोवाचेत्यादिनाब्रह्मस्वरूपोक्तेः । तत्रवक्तव्यंकिमपिनेतिभावः । तस्यैतस्याःब्रह्मविद्यायाःतपोदमःकर्मचप्रतिष्ठा । तपःकृच्छ्रचांद्रायणादि । शास्त्रपर्या

उप० । यदेराद्गच्छतीत्यचमनोनेनैवतदुपस्मरति । अभीक्ष्णंसंकल्पस्तद्धतद्धनंनाम तद्धनमित्युपासितव्यं ॥ ३ ॥ सयएतदेवंवेदाभिहैनं सर्वाणिभूतानिसंप्रांछंति । उपनिषदंभोब्रूहीति । उक्तातउपनिषत् । ब्राह्मींवावतउपनिषदमब्रूमेति । तस्यैतपोदमःकर्मेतिप्रतिष्ठा ।

लोचनंवा । दमइंद्रियनिग्रहः । कर्मतुवर्णाश्रमोचितंक्रियानुष्ठानं । प्रतिष्ठाप्रतिष्ठाहेतुः । तपआदिमत्त्वंविद्याप्रतितिष्ठतीत्यर्थः । वेदाःऋगाद्याः । तदनुकूलग्रंथाश्च । शिक्षाकल्पोव्याकरणंनिरुक्तंछंदोज्यौतिषमितिषडंगरूपसर्वांगानि । सत्यंमीमांसा । आयतनमुत्पत्तिस्थानं । तस्याइत्यनुषंगः । विद्यायाइत्यर्थः । एतदुपनिषज्ज्ञानिनःफलमाह । यइति । योधिकारीएतामुपनिषदंवेदस पाप्मानमपहत्यानंतेदेशकालगुणापरिच्छिन्नेस्वर्गेस्वरूपभूतसुखज्ञानात्मकेलोकेप्रकाशरूपेज्येयेश्रेष्ठेब्रह्मणीतियोज्यं । प्रतितिष्ठति प्रतितिष्ठति । द्विरुक्तिःसर्वावधारणार्था ॥ ४ ॥ इतिचतुर्थःखंडः ॥ ४ ॥ अनंतगुणपूर्णायदोषदूरायविष्णवे । नमःश्रीप्राणनाथायभक्ताभीष्टप्रदायिने ॥ ७ ॥ इतिश्रीराघवेंद्रयतिकृततलवकारोपनिषत्खंडार्थःसंपूर्णः ॥ ७ ॥

उप० । वेदाःसर्वांगानिसत्यमायतनं । योहवाएतामुपनिषदमेवंवेदापहत्यपाप्मानमनंतेस्वर्गेलोकेज्येयेप्रतितिष्ठतिज्येयेप्रतितिष्ठति ॥ ४ ॥ चतुर्थः खंडः ॥ ४ ॥ इतितलवकारोपनिषत्समाप्ता ॥

अयं ग्रंथः कुंभघोणस्थेन टी. आर्. कृष्णाचार्येण मुंबय्यां निर्णयसागरमुद्रणालये मुद्रयित्वा प्रकाशितः.
शाकः १८२९ सन १९०७.

॥ तलवकारोपनिषत्खंडार्थःसंपूर्णः ॥

॥ तलवकारव्यासतीर्थीयटीकाप्रारंभः ॥

श्रीमद्भनुमद्भीममध्वांतर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवायनमः ॥ ॐ ॥ जडाजडात्मकंविश्वंकृत्वाधिष्ठायसंहरन् ॥ स्वभावात्क्रीडतेयस्तंवंदेश्रीमध्ववल्लभं ॥ १ ॥ योसुरानजयद्देवहृदयस्थस्तदर्थतः ॥ ददौचाभीष्टमिष्टेभ्यस्तंवंदेमध्ववल्लभं ॥ २ ॥ तलवकारोपनिषदंव्याख्यास्यन्भगवानानंदतीर्थमुनिस्तदुक्तगुणैरुपश्लोकयन्नारायणंप्रणमति ॥ अनंतेति ॥ नतत्रचक्षुर्गच्छतीत्यादिना सुरैरप्यगम्यत्वमुक्तं तत्सर्वथादर्शनायोग्यत्वात्किमित्यतउक्तं ॥ अनंतगुणपूर्णत्वादिति ॥ ब्रह्महदेवेभ्योविजिग्यइत्यादिनोक्तंसर्वेष्टदातृत्वं । अनिष्टमिष्टंसाध्वसाधुवाप्रतिमनःपतति तत्करणत्वान्मनसःस्वतोनयुक्तं । अतःकेनप्रेषितंप्रेरितंपतति । प्रथमोमुख्यः । युक्तोनियुक्तः । इमांवाचंकेनइषितांप्रेरितांवदंतिचक्षुःश्रोत्रंकउदेवोयुनक्तीतिप्रश्नः यन्मनआदिप्रेरकंत्वयापृष्टं सउइतिपरिहारश्चप्रतीयते । प्रष्टा उत्तरप्रदाताच कावितिनज्ञायते अतस्तत्प्रश्नवाक्यंव्याचष्टे ॥ वैजयंतइति ॥ वैजयंतोनामकश्चित्पर्वतः । इतःपूर्वंकस्याप्यप्रकृतत्वात्सउइतिकथंतच्छब्देनपरामर्शइत्यतोध्यानप्रकृतत्वेनतद्घटयन् श्रोत्रस्यश्रोत्रमित्यादिपरिहारवाक्यंव्याचष्टे ॥ ध्यात्वेति ॥ यःप्राणस्यप्रणेता चक्षुरादेश्चप्रणेता सविष्णुरवधार्यतामितिसंबंधः । चक्षुरादिप्रणेतृत्ववेत्तुःफलमाह ॥ अतिमुच्येति ॥ अस्माल्लोकात्प्रेत्यगत्वाऽतिमुच्यसंसारादमृताभवंतीतिसंबंधः । कीदृशंभगवतःप्राणादिप्रेरकत्वमितिजिज्ञासायां तत्रचक्षुर्नाद्यप्रवृत्तेःकीदृशंतदितिनजानीमइत्याह ॥ नतत्रचक्षुरिति ॥ तद्व्याचष्टे ॥अगम्यइति॥ सर्वात्मनाचक्षुराद्यगम्यस्तर्हीत्यतआह ॥ अन्यदेवेति ॥ विदिताज्जगतोऽविदिताच्छशविषाणादेरन्यदेवतत् । तत्राधीत्यस्यार्थमाह ॥ सर्वोत्तमश्चसर्वत्रेति ॥ नतत्रचक्षुर्गच्छतीत्यादिविवृण्वन्मनोगोचरजीवात्मकत्वात्कथंमनोगोचरत्वमितिशंकांचपरिह

रति ॥ यद्वाचानभ्युदितमित्यादिना ॥ येनचक्षूंषिपश्यंतिदृश्यंते । तेतवउपआसतदेवब्रह्मविद्धि । यद्वाचानभ्युदितमित्या
दिवाक्यजातंव्याचष्टे ॥ प्राणादीनामिति ॥प्रथमःखंडः॥१॥ तद्वाक्यजातस्यतात्पर्यमाह ॥यंसम्यंगिति ॥ ब्रह्मसाकल्येन
ज्ञातुमशक्यमित्युक्तमुपपादयति ॥ यदीति ॥ यदित्वंब्रह्मअहंसुवेदेतिमन्यसे तर्हित्वमपिनूनंदहरमेवब्रह्मणोरूपंवेत्थ ब्रह्मणोऽ
नंतत्वादित्यर्थः । यत्यस्मादहरमेववेत्थ । अथतस्मात् त्वंत्वयिदेवेषुचास्यब्रह्मणोयद्रूपं तत्तेमीमांस्यमेव । अस्तुत्वदतिरिक्तःस
र्वोपिजनःब्रह्मनसम्यग्वेदेतित्वंतुसम्यग्वेत्थेत्यतआह ॥मन्यइति॥ मामन्ये अयंब्रह्मसुसम्यग्वेदेतिवदंति अहंतुब्रह्मविदितंनम
न्यइतियोजना। तर्हित्वमपिब्रह्मनवेत्थकिमित्यतआह ॥ नोनवेदेति ॥ नवेदेतिनो किंतुवेदचेति । ब्रह्मणःसाकल्येनाज्ञेयत्वमुपपा
द्यउपसंहरति ॥योनइत्यादिना॥ नोस्माकंमध्येयस्तुब्रह्मअहंवेदेतिवदातेसतन्नोवेद । तत्कुतः । परिच्छिन्नत्ववेदनात् । अहंनवेदे
तियोवदतिअसौवेदच कुतःब्रह्मणोपरिच्छिन्नत्वज्ञानात् । यस्यब्रह्माविदितमितिमतंतस्यब्रह्मविदितं । उक्तहेतोः । यस्यब्रह्ममतमि
तिमतंसनवेद । उक्तहेतोः । वयंब्रह्मसम्यगपरोक्षतोविद्मइतिविजानतामविज्ञातं । उक्तहेतोः । उक्तवैपरीत्येनविजानतांविज्ञातं उक्तहे
तोः। अत्रश्रवणमननपरोक्षज्ञानांसाकल्यागोचरत्वमुच्यतेब्रह्मणः । अप्रतीतेर्योनस्तद्वेदेत्यादिव्याचष्टे ॥सर्वात्मनेत्यादिना॥
योनस्तद्वेदेत्यादेस्तात्पर्यमाह ॥ नातिवेद्यइति ॥ नेदंयदिदमित्येतदंतरितमप्रतीतेर्व्याचष्टे॥ नेदमित्यादिना ॥ जीवब्रह्मणोर
भेदाभावेस्वयंमूलाभिमतांनियामकत्वादिलक्षणांउपपत्तिमाह ॥ नियामकंतदित्यादिना॥ अस्तुब्रह्मसाकल्येनागोचरइति॥ इत
रेषांकथंतेनाभीष्टसिद्धिरित्यतआह ॥प्रतिबोधेति ॥ ब्रह्मश्रुतंमतंप्रतिबोधविदितंचेदमृतत्वंहिविंदतइत्यर्थः । ज्ञानेनामृतत्वंविंद

तइत्युक्तं। तत्रकिंज्ञानेनसर्वाभीष्टसिद्धिरित्यतोज्ञानोत्तरकर्मणा चेत्याह ॥ आत्मनेति ॥ आत्मा ज्ञानोत्तरकालीनयज्ञादिप्रयत्नेन वीर्यमानंदातिशयंविंदते । विद्ययाऽमृतं अविद्यानिवृत्तिमिति । अस्तुब्रह्मज्ञानंमोक्षसाधनं । तत्कार्यांतरंसंपादयिष्यतइत्यतआह ॥इहेति॥ अथतर्हि तत्रेयंभद्रमस्ति । भद्रविनष्टिभावात्धीराभूतेषुभूतेष्क्रित्यादियोज्यं ॥द्वितीयःखंडः॥ २॥ ब्रह्मादृश्यमत्यद्भुतमित्युक्तं । तत्रार्थेकांचनाख्यायिकामाह॥ब्रह्मेत्यादिना॥ ततूतेषामहंकरं तेभ्योहप्रादुर्बभूव। ब्रह्मादिसहितमितिशेषः । तद्वाक्यजातंव्याकरोति ॥ इत्यत्रेत्यादिना ॥ ब्रह्मादिभिःसहागमनस्यजिज्ञापयिषितंप्रयोजनमाह ॥ एतेभ्योपीति ॥ प्रयोजनांतरमाह ॥ यूयमिति ॥ इंद्रेसमागच्छतिकिमर्थंतिरोदधेब्रह्मेत्यतस्तस्यप्रयोजनमाह ॥ तत्रेति ॥ पृच्छतुकिमशक्यमित्यतआह ॥ मत्त इति ॥ दैत्यदूषितत्वान्नशक्तिमान् । उमास्थापनेप्रयोजनमाह ॥ एषेति ॥ तृतीयःखंडः ॥ ३ ॥ तस्माद्वाइतिपरामृष्टोहेतुः कइतिनज्ञायते । एतेदेवाअतितरामिवान्यान्देवानित्यन्यदेवतातिशयितादेवाश्चकइत्यतस्तद्वाक्यंव्याचष्टे ॥ यस्मादिति ॥ अथवा तस्माद्वाएतेदेवाअतितरामिवान्यान्देवान्एतेइत्युक्ताःके यदग्निर्योयमग्निर्वायुरिंद्र स्तस्मादितिपरामृष्टंहेतुमेवविशदमाह ॥ तेह्येनंनेदिष्ठंपस्पृशुरिति ॥ नेदिष्ठमतिसमीपस्थं । स्पर्शनमेवविवृणोति ॥ तेह्येनत्प्रथमःप्रथमंविदांचकारचक्रुरिति ॥ यदग्निर्वायुरिंद्रइत्युक्तेंद्रस्याऽन्यादिसाध्यंप्रतीत्यते तांपरिहरति ॥ तस्माद्वाइंद्रइति ॥ तद्व्याचष्टे ॥ इंद्रस्तिवति ॥ तस्माद्वाएतेदेवाइतिवाक्यंप्रकारांतरेणव्याचष्टे ॥ दक्षादिभ्यइत्यादिना ॥ ॐमितियक्षंविचार्यमेवेत्यूह्यं ॥ नासिक्यवायुरित्युक्तरीत्याव्याख्यानांतरं । ब्रह्मादीनामुक्तमप्याधिक्यंप्रसंगप्राप्तंपुनराह ॥ एतेभ्यइति ॥ यदग्निर्वायुरित्युक्त्याऽग्नेःश्रेष्ठत्वप्रतीतिंनिवा

रयंस्तारतम्येकःप्रथमःकोतिमइत्यतआह ॥ एतेषामिति ॥ पूर्वमीरिताः उत्तरकक्ष्यात्वेनेतिशेषः । अग्नेःसर्वात्मत्वेकारणमाह ॥ अग्निरिति ॥ विष्ण्वभिसंबंधात् विष्णुज्ञानस्तुतारतम्याभिसंबंधात् । अधिदैवमध्यात्मंचेत्यस्यंरूपमुपदिशति ॥ तस्यैष इत्यादिना ॥ अप्रतीतेस्तद्धस्त्यजातंव्याचष्टे ॥ व्यद्योतयदित्यादिना ॥ रूपाणांस्थानभेदकृतोभेदोनमंतव्यइतिभावेनोक्तं ॥ सएवैकइति ॥ येनप्रेरितंमनोविषयान्स्मरति वननीयतःभजनीयत्वात् । तद्वनमित्युपासकस्यफलमाह ॥सयएतदिति॥ तद्व्याचष्टे ॥ एवंमिति ॥ उपनिषद्विद्यायाउपदिश्यमानत्वादुपनिषदंभोब्रूहीतिप्रश्नस्यो क्तादुपनिषदित्यादिपरिहारस्यचायुक्त त्वंप्रतीयतेऽतस्तात्पर्यव्यंजयन्व्याचष्टे ॥ एतदित्यादिना ॥ विद्या क्रियतेनिरूप्यतेयेन प्रतिपाद्यभेदनेति । प्रतिपाद्यंपृच्छसि किंवोत्पन्नायास्तस्याअवस्थानकारणानि उतवातस्याःकारणानीत्याशयवान्ब्रह्माह ॥ उक्तातइत्यादिना ॥ तद्व्याचष्टे ॥ वि द्यावेद्यमिति ॥ कानिविद्यास्थानानिइत्यतस्तस्याः वेदाः षडंगानि निर्णयःकारणानीतियोजना ॥ सत्यमित्यस्यनिर्णयइतिव्या ख्यानं ॥ एतदुपनिषद्वेत्तुःफलमाह ॥ योवाएतामिति ॥ स्वर्गे स्वरूपभूतरमणज्ञानवति । लोकेप्रकाशरूपे ज्येयेश्रेष्ठे प्रतिति ष्ठति । यत्प्रसिद्धस्वरूपफलंप्रतीयतेतत् अनंतफलब्रह्मविद्याभ्यासिनामनुपपन्नमतस्तद्व्याचष्टे ॥ वेदेति ॥ प्रमाणेनव्याख्यात मपि व्यद्युतदाइत्यादि स्ववाक्येनविशदयति ॥ विद्युतइति ॥ सूर्यादिप्रकाशोभगवदधीनइत्युक्तं तत्स्मृतिश्रुत्युदाहरणेनसम र्थयते ॥ यदिति ॥ भगवानादौनिमीलिताक्षोभवदितिकुतइत्यतआह ॥ सइति ॥ यएकोगुणमयःपरोविशेषःपुरातनःपुरुषः अग्रेनिशारूपेप्रलयकालेकारणेषुसुप्तशक्तिषुजगदीश्वरेआत्मनिनिधायनिमीलितात्माआत्मनिमत्रस्मिन्नेवासीत् सोयंकिलेतिसंबंधः।

न्यमीमिषदाइत्यत्राकारस्यसमंतादित्यर्थउक्तः । अथांतरंचाह ॥ पूर्णत्वादिति ॥ यदेतदाःपूर्णतन्न्यमीमिषदित्यन्वयः । अभीक्ष्णंसंकल्पइतिकस्यविशेषणमितिनज्ञायतेऽतआह ॥ अभीक्ष्णमिति ॥ लिंगव्यत्ययोयमित्याह्यस्तदर्थमाह ॥ संकल्पकमिति ॥ उपनिषदंमेब्रूहीतिप्रश्नेतस्यैतपोदमःकर्मेतिप्रतिष्ठेत्यपृष्टोक्तिःकथमित्यतःप्रश्नाभिप्रायकथनेनघटयन्नाह ॥ सप्रतिष्ठामिति ॥ निर्णयइत्येतत्सत्यपदेनव्याख्यातत्वेपिअस्पष्टत्वात् पुनर्व्याकरोति ॥ सत्यमिति ॥ ननुसत्यमितिमीमांसेतिकुतः । सत्यवचनेप्रसिद्धत्वादित्यतोनिर्वचनप्रमाणेनसमर्थयते ॥ निर्णीयतइति ॥ ननुविद्यास्थानानांचतुर्दशत्वात्कथंवेदाःसर्वांगानिसत्यमायतनमितिस्थानत्रित्वोक्तिरित्यतोविद्यास्थानानांचतुर्दशत्वेपिविवक्षाभेदात्त्रित्वोक्तिरित्याह ॥ ऋग्यजुरित्यादिना ॥ शिक्षाद्यं तथास्मृतय श्चांगानीत्युच्यंते । मीमांसा तर्कशास्त्रंच सत्यमित्युच्यते । यतस्तस्माद्विद्यायतनंत्रयमित्युक्तमित्यर्थः ॥ मंगलावसानस्य शास्त्रस्यप्रचयादिहेतुत्वात् भाष्यंसमाप्यांतेपिस्वेष्टदेवतास्तुतिनमनरूपंमंगलमाचरति ॥ यइति ॥ यत्पदंमुनिभिर्ध्यातंवेदांतश्रांतमानसैः ॥ तंवंदेपरमात्मानंविष्णुंश्रीमध्ववल्लभं ॥ १ ॥ छ ॥ इतिश्रीमदानंदतीर्थभगवत्पादविरचिततलवकारोपनिषद्भाष्यस्यविवरणंश्रीमज्जयतीर्थपूज्यचरणशिष्यव्यासतीर्थविरचितंसंपूर्णं ॥

RAMAKRISHNA SANSKRIT COLLEGE LIBRARY FORT, BANGALORE.

अयं ग्रंथः कुंभघोणस्थेन टी. आर्. कृष्णाचार्येण मुंबय्यां निर्णयसागरमुद्रणालये मुद्रयित्वा प्रकाशितः । शाकः १८२९ सन १९

॥ तलवकारव्यासतीर्थीयटीकासंपूर्णा ॥